No. १०५९-घ

Title तैत्तिरीयोपनिषदः शिक्षाध्यायः

Author

Extent ४ Age

Subject शिक्षावल्ली-उपनिषत्,
सम्पूर्णम्

नं० १० ५-६-च

तैत्तिरीयोपनिषद्दीपिका प्रथमाध्याय: (शिक्षावल्ली) (उपनिषद्)

पत्राणि ४ (सम्पूर्णम्) शिक्षा पत्र ४

नं० १०५९-च

॥शि०॥ श्रीगणेशायनमः॥ हरिः ऽ ॐ॥ शंनोमित्रःशंवरुणः॥ शंनोभवत्वर्यमा॥ शं
न इंद्रोबृहस्पतिः॥ शंनोविष्णुरुरुक्रमः॥ नमोब्रह्मणे॥ नमस्तेवायो॥ त्वमेव
प्रत्यक्षंब्रह्मासि॥ त्वमेवप्रत्यक्षंब्रह्मवदिष्यामि॥ ऋतंवदिष्यामि॥ सत्यंवदि
ष्यामि॥ तन्मामवतु॥ तद्वक्तारमवतु॥ अवतुमां॥ अवतुवक्तारं॥ ॐ शांतिः
शांतिः शांतिः॥ शीक्षांव्याख्यास्यामः॥ वर्णस्वरः॥ मात्राबलं॥ सामसंतानः॥ इ
त्युक्तः शीक्षाध्यायः॥१॥ शीक्षांपचौ॥ सहनौयशः॥ सहनौब्रह्मवर्चसं॥ अथा
तः सꣳहितायाउपनिषदंव्याख्यास्यामः॥ पंचस्वधिकरणेषु॥ अधिलोकम
धिज्यौतिषमधिविद्यमधिप्रजमध्यात्मं॥ तामहासꣳहिताइत्याचक्षते॥ अथा
धिलोकं॥ पृथिवीपूर्वरूपं॥ द्यौरुत्तररूपं॥ आकाशःसंधिः॥ वायुःसंधानं॥
इत्यधिलोकं॥ अथाधिज्यौतिषं॥ अग्निःपूर्वरूपं॥ आदित्यउत्तररूपं॥ आपः
संधिः॥ वैद्युतःसंधानं॥ इत्यधिज्यौतिषं॥ अथाधिविद्यं॥ आचार्यःपूर्वरूपं॥ अं
तेवास्युत्तररूपं॥ विद्यासंधिः॥ प्रवचनꣳसंधानं॥ इत्यधिविद्यं॥ अथाधिप्रजं॥
मातापूर्वरूपं॥ पितोत्तररूपं॥ प्रजासंधिः॥ प्रजननꣳसंधानं॥ इत्यधिप्रजं॥३॥
अथाध्यात्मं॥ अधराहनुःपूर्वरूपं॥ उत्तराहनुरुत्तररूपं॥ वाक्संधिः॥ जिह्वासं ॥१॥
धानं॥ इत्यध्यात्मं॥ इतीमामहासꣳहिताः॥ यएवमेतामहासꣳहिताव्याख्या

त्यावेद ॥ संधीयते प्रजया पशुभिः ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥ ४ ॥ संधि
राचार्यः पूर्वरूपमित्यधिप्रजं लोकेन ॥ यश्छंदसामृषभो विश्वरूपः ॥ छंदोभ्योध्य
मृतात्संबभूव ॥ स मेंद्रो मेधया स्पृणोतु ॥ अमृतस्य देव धारणो भूयासं ॥ शरीरं
मे विचर्षणं ॥ जिह्वा मे मधुमत्तमा ॥ कर्णाभ्यां भूरि विश्रुवं ॥ ब्रह्मणः कोशोसि मे
धया पिहितः ॥ श्रुतं मे गोपाय ॥ आवहंती वितन्वाना ॥ १ ॥ कुर्वाणा चीरमात्मनः ॥
वासांसि मम गावश्च ॥ अन्नपाने च सर्वदा ॥ ततो मे श्रियमावह ॥ लोमशां पशु
भिः सह स्वाहा ॥ आमायंतु ब्रह्मचारिणः स्वाहा ॥ विमायंतु ब्रह्मचारिणः स्वाहा ॥
प्रमायंतु ब्रह्मचारिणः स्वाहा ॥ दमायंतु ब्रह्मचारिणः स्वाहा ॥ शमायंतु ब्रह्म
चारिणः स्वाहा ॥ २ ॥ यशो जनेसानि स्वाहा ॥ श्रेयान्वस्यसोसानि स्वाहा ॥ तं
त्वा भग प्रविशानि स्वाहा ॥ स मा भग प्रविश स्वाहा ॥ तस्मिन्सहस्रशाखे ॥ नि
भगाहं त्वयि मृजे स्वाहा ॥ यथापः प्रवता यंति ॥ यथा मासा अहर्जरं ॥ एवं मां ब्रह्म
चारिणः ॥ धातरायंतु सर्वतः स्वाहा ॥ प्रतिवेशोसि प्र मा भाहि प्र मा पद्यस्व ॥ ३ ॥
वितन्वाना शमायंतु ब्रह्मचारिणः स्वाहा ॥ धातरायंतु सर्वतः स्वाहेकं च ॥ भूर्भु
वः सुवरिति वा एतास्तिस्रो व्याहृतयः ॥ तासामुह स्मैतां चतुर्थी ॥ महाचमस्यः
प्रवेदयते ॥ मह इति ॥ तद्ब्रह्म ॥ स आत्मा ॥ अंगान्यन्यादेवताः ॥ भूरिति वा अयं लोकः ॥

॥शि०॥ भुवइत्यंतरिक्षं॥सुवरित्यसौलोकः॥१॥ महइत्यादित्यः॥आदित्येनवावसर्वे
लोकामहीयंते॥भूरितिवाअग्निः॥भुवइतिवायुः॥सुवरित्यादित्यः॥महइतिचं
द्रमाः॥चंद्रमसावावसर्वाणिज्योतींषिमहीयंते॥भूरितिवाऋचः॥भुवइति
सामानि॥सुवरितियजूंषि॥२॥महइतिब्रह्म॥ब्रह्मणावावसर्वेवेदामही
यंते॥भूरितिवैप्राणः॥भुवइत्यपानः॥सुवरितिव्यानः॥महइत्यन्नं॥अन्नेन
वावसर्वेप्राणामहीयंते॥तावाएताश्चतस्रश्चतुर्धा॥चतस्रश्चतस्रोव्याहृतयः॥
तायोवेद॥सवेदब्रह्म॥सर्वेस्मैदेवाबलिमावहंति॥३॥असौलोकोयजूंषि
वेदद्वेच॥सयएषोंतरहृदयआकाशः॥तस्मिन्नयंपुरुषोमनोमयः॥अमृ
तोहिरण्मयः॥अंतरेणतालुके॥यएषस्तनइवावलंबते॥सेंद्रयोनिः॥यत्रा
सौकेशांतोविवर्त्तते॥व्यपोह्यशीर्षकपाले॥भूरित्यग्नौप्रतितिष्ठति॥भुव
इतिवायौ॥सुवरित्यादित्ये॥महइतिब्रह्मणि॥आप्नोतिस्वाराज्यं॥आप्नोति
मनसस्पतिं॥वाक्पतिश्चक्षुष्पतिः॥श्रोत्रपतिर्विज्ञानपतिः॥एतत्ततोभव
ति॥आकाशशरीरंब्रह्म॥सत्यात्मप्राणारामंमनआनंदं॥शांतिसमृद्धममृतं॥
इतिप्राचीनयोग्योपास्स्व॥वायावमृतमेकंच॥५॥पृथिव्यंतरिक्षंद्यौर्दिशोवा ॥२॥
नरदिशाः॥अग्निर्वायुरादित्यश्चंद्रमानक्षत्राणि॥आपओषधयोवनस्पत

य आकाश आत्मा ॥ इत्यधिभूतं ॥ अथाध्यात्मं ॥ प्राणो व्यानोऽपान उदानः समानः ।
चक्षुः श्रोत्रं मनो वाक्त्वक् ॥ २ ॥ चर्म मांꣳसꣳ स्नावास्थि मज्जा ॥ एतदधिविधाय ऋ
षिरवोचत् ॥ पांक्तं वा इदꣳ सर्वं ॥ पांक्तेनैव पांक्तꣳ स्पृणोतीति ॥ सर्वमेकं च ॥ ६ ॥ ओं
मिति ब्रह्म ॥ ओमितीदꣳ सर्वं ॥ ओमित्येतदनुकृति ह स्म वा अप्यो श्रावयेत्याश्रा
वयंति ॥ ओमिति सामानि गायंति ॥ ओꣳ शोमिति शस्त्राणि शꣳसंति ॥ ओमित्यध्व
र्युः प्रतिगरं प्रतिगृणाति ॥ ओमिति ब्रह्मा प्रसौति ॥ ओमित्यग्निहोत्रमनुजानाति ॥
ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति ॥ ब्रह्मैवोपाप्नोति ॥ १ ॥ ८ शा ७ ऋ
तं च स्वाध्यायप्रवचने च ॥ सत्यं च स्वाध्यायप्रवचने च ॥ तपश्च स्वाध्यायप्रवचने च ।
दमश्च स्वाध्यायप्रवचने च ॥ शमश्च स्वाध्यायप्रवचने च ॥ अग्नयश्च स्वाध्यायप्र
वचने च ॥ अग्निहोत्रं च स्वाध्यायप्रवचने च ॥ अतिथयश्च स्वाध्यायप्रवचने च ॥ मा
नुषं च स्वाध्यायप्रवचने च ॥ प्रजा च स्वाध्यायप्रवचने च ॥ प्रजनश्च स्वाध्यायप्रव
चने च ॥ प्रजातिश्च स्वाध्यायप्रवचने च ॥ सत्यमिति सत्यवचा राथीतरः ॥ तप इति ।
तपोनित्यः पौरुशिष्टिः ॥ स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः ॥ तद्धि तपस्तद्धि
तपः ॥ १ ॥ प्रजा च स्वाध्यायः प्रवचने च षट् च ॥ अहं वृक्षस्य रेरिवा ॥ कीर्तिः पृष्ठं गिरे
रिव ॥ ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि ॥ द्रविणꣳ सवर्चसं ॥ सुमेधा अमृतो

॥त्रि०॥ क्षितः॥ इति त्रिशंको र्वेदानुवचनं॥१॥ अनूच्य षट्‌ ६ वेदमनूच्याचार्योन्तेवासिनमनु
3 शास्ति॥ सत्यं वद॥ धर्मं चर॥ स्वाध्यायान्मा प्रमदः॥ आचार्याय प्रियं धनमाहृत्य प्र
जातंतुं मा व्यवच्छेत्सीः॥ सत्यान्न प्रमदितव्यं॥ धर्मान्न प्रमदितव्यं॥ कुशलान्न प्र
मदितव्यं॥ भूत्यै न प्रमदितव्यं॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं॥१॥ देवपितृ
कार्याभ्यां न प्रमदितव्यं॥ मातृदेवो भव॥ पितृदेवो भव॥ आचार्यदेवो भव॥ अतिथि
देवो भव॥ यान्यनवद्यानि कर्माणि॥ तानि सेवितव्यानि॥ नो इतराणि॥ यान्यस्मा
कं सुचरितानि॥ तानि त्वयोपास्यानि॥ नो इतराणि॥ ये के चास्मच्छ्रेयांसो ब्रा
ह्मणाः॥ तेषां त्वयासने न प्रश्वसितव्यं॥ अश्रद्धया देयं॥ श्रिया देयं॥ श्रद्धयादेयं॥
ह्रिया देयं॥ भिया देयं॥ संविदा देयं॥ अथ यदि ते कर्म विचिकित्सा वा वृत्त विचि
कित्सा वा स्यात्॥२॥ ये तत्र ब्राह्मणाः संमर्शिनः॥ युक्ता आयुक्ताः॥ अलूक्षा ध
र्मकामाः स्युः॥ यथा ते तत्र वर्तेरन्॥ तथा तत्र वर्तेथाः॥ अथाभ्याख्यातेषु॥ ये तत्र ब्राह्मणाः संमर्शि
नः॥ युक्ता आयुक्ताः॥ अलूक्षा धर्मकामाः स्युः॥ यथा ते तेषु वर्तेरन्॥ तथा तेषु वर्ते
थाः॥ एष आदेशः॥ एष उपदेशः॥ एषा वेदोपनिषत्॥ एतदनुशासनं॥ एवमुपा
सितव्यं॥ एवमु चैतदुपास्यं॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं॥ तानि त्वयो ॥३॥
पास्यानि तेषु वर्तेरन्नुपत्तचे॥१०॥ शं नो मित्रः शं वरुणः॥ शं नो भवत्वर्यमा॥ शं न इं
निस्था यथा ते तत्र वर्तेरन्॥५॥

॥शि०॥ शंनो बृहस्पतिः ॥ शंनो विष्णुरुरुक्रमः ॥ नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मा
सि ॥ त्वामेव प्रत्यक्षं ब्रह्मवादिषं ॥ ऋतमवादिषं । सत्यमवादिषं ॥ तन्मामावीत् ॥ तद्वक्
५ कारमावीत् ॥ आवीन्मां ॥ आवीद्वक्तारं ॥ ॐ शांतिः शांतिः शांतिः ॥ सत्यमवादिषं । पंचचा
शं न शीक्षांः सहनौ यश्छंदसां भूयसः । पृथिव्यो मिश्चुतं वाहं वेदन् घशानो ह्वादशा
शं न महव्यादिव्यो नोइतराणि । त्रयोविंः शांतिः ॥ ॥ छ ॥ ॥ ॥ शुभं भवतु ॥ छ ॥